# Shri Vidyarya Stotram

# શ્રીવિદ્યાર્યાસ્તોત્રમ્

## Document Information

Text title : Vidyarya Stotram

File name : vidyAryAstotram.itx

Category : subrahmanya

Location : doc_subrahmanya

Transliterated by : Sivakumar Thyagarajan shivakumar24 at gmail

Proofread by : Sivakumar Thyagarajan, PSA Easwaran

Latest update : March 14, 2020

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 14, 2020

*sanskritdocuments.org*

Shri Vidyarya Stotram

# શ્રીવિદ્યાર્યાસ્તોત્રમ્

ૐ શ્રીગણેશાય નમઃ ।

કામિતકલ્પતરુભ્યઃ કુર્મઃ પ્રણતિં કુમારનામભ્યઃ ।
કુલગિરિજાકુતુકેભ્યઃ કેભ્યશ્ચિત્કેકિરાજકેતુભ્યઃ ॥ ૧॥

અસ્તુ મનસ્તુષ્ટ્યૈ મે વસ્તુ મુનિસ્તુત્યમસ્તમિતતૂસ્તમ્ ।
ધ્વસ્તસમસ્તસપત્નં હસ્તલસચ્છક્તિ નિસ્તુલૈશ્વર્યમ્ ॥ ૨॥

એકં પ્રશમિતશોકં શ્રીકણ્ઠસ્યાશ્રયે ત્રિયં તોકમ્ ।
આકમ્પિતરિપુલોકં મા કઞ્ચન લેખમન્યમવિવેકમ્ ॥ ૩॥

ઈક્ષામહે કદાગ્રે સાક્ષાલ્લાક્ષાઝરીસદૃક્ષાભમ્ ।
રૂક્ષાસુરકુલશિક્ષાદીક્ષાધરમક્ષયોક્ષરથભાગ્યમ્ । ૪॥

લમ્બોદરસહજેભ્યો બિમ્બોકેભ્યો બ્રુવે નમોવાકમ્ ।
બિમ્બોપમાધરેભ્યઃ કમ્બોરાતઙ્કદાયિકણ્ઠેભ્યઃ ॥ ૫॥

અર્ભકમદ્ભુતમેકં નિર્ભરમન્તર્ભજામિ ભવ્યાર્થમ્ ।
યો હિ ગિરીશાત્મભવો ભજતિ ગિરીશાત્મજાત્મભવભાવમ્ ॥ ૬॥

હન્ત નિરન્તરમન્તઃ સન્તનુ દેવં તમાપદન્તકરમ્ ।
કિં તપસાન્યેન ફલં ચિન્તયતામન્તકાન્તકતનૂજમ્ ॥ ૭॥

રાકાશશધરસુષમાનીકાશમૃદુસ્મિતાર્દ્રમુખકમલમ્ ।
શ્રીકાન્તભાગિનેયં શોકાન્તકરં ભજેઽહમેકાન્તમ્ ॥ ૮॥

ઈડે હૃતભવપાશં સુરપૃતનેશં કૃતાસુરવિનાશમ્ ।
ઉદ્ધતરાજસદેશં વેશં વેશં વૃથૈવમાનેશમ્ ॥ ૯॥

મનસા વચસા શિરસા ચિન્તય સઙ્કીર્તયાનમ કુમારમ્ ।
ઝટિતિ સ વિમતાન્હત્વા ભગવાન્કુર્યાદભીષ્ટઘટનાં તે ॥ ૧૦॥

હરિહયમુખ્યસુરાણામરિભયશાન્તિપ્રદાનનિષ્ણાતઃ ।

ગિરિતનયાઽઽત્મભવો માં ભરિતદયાપાઙ્ગગોચરીકુર્યાત્ । ૧૧।
અભિમતફલદો દેવૈરભિનુતમહિમા મમાસ્તુ સ કુમારઃ ।
યસ્ય શિખી જિષ્ણુર્ભજતિ પ્રકૃતિત્વમપિ ચ પત્રત્વમ્ ॥ ૧૨॥

સ જયતિ વિચિત્રચરિત્રઃ શાક્તીકાગ્રેસરો મહાવીરઃ ।
શંસન્તિ યં મહાન્તઃ પુત્રં ચ પતિં ચ દેવવાહિન્યાઃ ॥ ૧૩॥

અમરનિરામયકન્દં સમરપરાભૃતશક્રરિપુવૃન્દમ્ ।
ભ્રમરમિવાધ્યરવિન્દં શ્રમરહિતં કુરુત ચેતસિ સ્કન્દમ્ ॥ ૧૪॥

કાઞ્ચન કૌતુકલહરીં ક્રૌઞ્ચનગચ્છેદિનીં પનીપદ્યે ।
કાઞ્ચનમણિગણવિલસત્કાઞ્ચિકયા લાઞ્છિતામલદુકૂલામ્ ॥ ૧૫॥

અવલોકયેઽન્તરનિશં શિવલોકસ્યૈકમુજ્જ્વલાભરણમ્ ।
નવલોહિતપ્રકાશં ભવલોપવિધાનનિપુણમગ્નિભુવમ્ ॥ ૧૬॥

હરતુ રિપૂનસ્માકં શરવણજો ભવતુ ચેષ્ટસઙ્ઘટકઃ ।
હરતુ હિમાચલતનયાનિરતિશયપ્રેમરત્નસમ્પુટકઃ । ૧૭।
અરુણં નિરવધિકરુણં શરણાગતરક્ષણે સજાગરણમ્ ।
શરણં ભજામિ તરુણં હરિણાઙ્કાભરણહાર્દપરિણામમ્ ॥ ૧૮॥

લલિતે વલ્લીમિલિતે લીયેમહિ મહસિ બાહુલેયાખ્યે ।
એકં યદપાદાનીચક્રે પ્રકૃતીસ્તુ ષડપિ જનિકર્તૃ । ૧૯॥

અરવિન્દવૈરિવદનં કુરુવિન્દમદાપહારરદનમ્ ।
શરદિન્દીવરનયનં સ્મર વૃન્દારકવિરોધિનિર્મથનમ્ ॥ ૨૦।
હસ્તે યસ્ય સદાઽઽસ્તે શક્તિર્યા કાચિદપ્રતિમશક્તિઃ ।
ભૂભૃદ્ભેદનચુઞ્ચુસ્તં ચુમ્બતુ માનસં ચિરાય મમ । ૨૧।
રમણીયાનનષટ્કં રભસવિદીર્ણાસુરોત્કરપૃષત્કમ્ ।
ભજતાનતભરણોત્કં ભગવન્તં કાર્તિકેયમપકલકમ્ ॥ ૨૨॥

ઈશાનાત્મજમીડે ક્લેશાનન્તં નયેત્સ મમ સર્વાન્ ।
બન્ધૂકાભઃ સાયંસન્ધ્યાસમયો યથાતપોદ્ધારાન્ ॥ ૨૩॥

મન્મથમથનતનૂજે મન્મનસો રતિરનારતં ભવતુ ।
ઉન્મદખલજનભયદે સન્મતિરાજીવિનીદિનાધીશે ॥ ૨૪॥

સહસા નિહતસપત્ના મહસાં નિધયો મહામહાનન્દાઃ ।
ઇહ સામ્રાજ્યમખણ્ડં ગુહ સાનતયો જનાઃપ્રપદ્યન્તે ॥ ૨૫॥

અઙ્ગાનમ ગાઙ્ગયં ભઙ્ગાકટભઙ્ગદાયકાઙ્ગાભમ્ ।
ભૃઙ્ગાભિરામકેશં શ‍ૃઙ્ગારાદ્વૈતચારુમુખચન્દ્રમ્ ॥ ૨૬॥

કલયે કપાલિપુત્રં કરુણાપાત્રં કલાપિવરપત્રમ્ ।
કલિમલદારુલવિત્રં કમલસુનેત્રં કલાધરસુવક્ત્રમ્ ॥ ૨૭॥

અસ્મિ નિલીયે તસ્મિન્ સુસ્મિતમુખસારસે સુરાભયદે ।
અસુરસમૂહાસુરસપ્રસૃમરતર્ષપ્રચણ્ડભુજભુજગે ॥ ૨૮॥

લોકોત્તરમવલોકે લોહિતરુચિ મનસિ કિમપિ તદ્ધામ ।
શોકોત્તરલોઽપિ જનો યત્સ્મૃતિમાત્રેણ ભવતિ નિર્વૃતધીઃ ॥ ૨૯॥

અનુપમસુષમશરીરં ભજત કુમારં ભવસ્ય સુકુમારમ્ ।
દનુજવિનાશવિહારં જલધિગભીરં જગદ્ધિતવિચારમ્ । ૩૦।
હતવિમતાવિતલેખે નિટિલતટશ્રીનિરસ્તશશિલેખે ।
મમ રતિરસ્તુ વિશાખે શમલતમસ્સમુદયાહિમમયૂખે । ૩૧।
રે માનસ વિસૃજેમાં સીમાં શોકસ્ય તાવદુદ્દામામ્ ।
કૌમારં સ્મર ચરણં ભૂમાનં ભજ સુખસ્ય ચામાનમ્ । ૩૨।
ઈશાત્પિતુરતિશયિતં પઞ્ચમુખાત્ષણ્મુખં નમસ્કુર્મઃ ।
યોઽયમધઃકુર્વાણો જયતિતરાં નીલકણ્ઠમુરગભુજમ્ ॥ ૩૩॥

મહિતદયાભરિતમતિં વિહિતનતાનન્દમમિતવીર્યનિધિમ્ ।
વિમથિતવિમતસમૂહં નમત મહાત્રિપુરસુન્દરીસૂનુમ્ ॥ ૩૪॥

ઇતિ શ્રીવિદ્યાર્યાસ્તોત્રં સમ્પૂર્ણમ્ ।

Entered by Sivakumar Thyagarajan

Proofread by Sivakumar Thyagarajan, PSA Easwaran

*Shri Vidyarya Stotram*

pdf was typeset on March 14, 2020

Please send corrections to *sanskrit@cheerful.com*